बाह्याली खुरली राजभक्तिः शुभगतादयः ॥"
इति कविकल्पलतायाम् १ स्तवकः ॥

राजकुष्माण्डः, पुं, वार्त्ताकी । इति जटाधरः ॥

राजकोषातकी, स्त्री, (राजप्रिया कोषातकी ।) भिङ्गाकविशेषः । घिया तोरइ इति हिन्दीभाषा ॥ तत्पर्य्यायः । हस्तिपर्णिका २ पीतपुष्पिका ३ धामार्गवः ४ केशफला ५ महाजाली ६ सपीतकः ७ । अस्या गुणाः । शीतत्वम् । ज्वरघ्नत्वम् । कफवातनत्वञ्च । इति मदनविनोदः ॥

राजखर्ज्जूरी, स्त्री, (राजप्रिया खर्ज्जूरी ।) श्रेष्ठखर्ज्जूरी । पिण्डखर्ज्जूरिका । तत्पर्य्यायः । राजपिण्डा २ नृपपिण्डा ३ । अस्या गुणाः । शैत्यत्वम् । स्वादे हिमत्वम् । गुरुत्वम् । पित्तदाहार्त्तिश्वासभ्रमनाशित्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥

राजगामि, [न्] त्रि, (राजानं गच्छतीति । गम् + णिनिः ।) राजसम्बन्धि । यथा,—
"अनृतञ्च समुत्कर्षे राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्ब्बन्धः समानि ब्रह्महत्यया ॥"
इति मानवे ११ अध्यायः ॥
"राजनि वा स्तेनादीनां परेषां मरणफलदोषाभिधानम् ।" इति कुल्लूकभट्टः ॥ अपि च ।
"अपुत्त्रस्य धनं पत्न्यभिगामि तदभावे मातृगामि तदभावे भ्रातृगामि तदभावे भ्रातृपुत्त्रगामि तदभावे सकुल्यगामि तदभावे बन्धुगामि तदभावे शिष्यगामि तदभावे सहाध्यायिगामि तदभावे ब्राह्मणधनवर्ज्जं राजगामि ।" इति दायभागग्रन्थधृतविष्णुवचनम् ॥

राजगिरिः, पुं, शाकभेदः । तत्पर्य्यायः । राजाद्रिः २ राजशाकिनी ३ राजशाकनिका ४ । अस्य गुणाः । रुच्यत्वम् । पित्तनाशित्वम् । शीतलत्वम् । स्थूलस्य तु अतिशीतलत्वम् । अतिरुच्यत्वञ्च । इति राजनिर्घण्टः ॥ (मगधदेशस्थः पर्व्वतविशेषश्च ॥)

राजग्रीवः, पुं, (राजते इति । राज् + अच् । राजा दीप्तिशालिनी ग्रीवा यस्य ।) मत्स्यविशेषः । फलुइ इति भाषा । यथा,—
"फलकी स्याच्चित्रफली राजग्रीवो मदार्मदः ॥"
इति त्रिकाण्डशेषः ॥

राजघः, त्रि, तीक्ष्णः । इति त्रिकाण्डशेषः ॥ (राजानं हन्तीति । हन् + "राजघ उपसंख्यानम् ।" ३ । २ । ५५ । इत्यस्य वार्त्तिकोक्त्या कप्रत्ययेन साधु ।) राजहन्ता । यथा,—
"अनल्पदग्धारिपुरानलोज्ज्वलै-
र्निजप्रतापैर्व्वलयं ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया
रराज नीराजनया स राजघः ॥"
इति नैषधे । १ । १० ॥

राजचिह्नकं, क्ली, उपस्थः । इति शब्दचन्द्रिका । चिह्नानां स्त्रीपुंविभाजकानां राजा इति व्युत्पत्त्या सिद्धम् ॥

राजजम्बूः, स्त्री, (जम्बूनां राजा । राजदन्तादित्वात् परनिपातः ।) पिण्डखर्ज्जूरम् । इति मेदिनी ॥ महाजम्बूः । इति राजनिर्घण्टः ॥

राजयक्ष्मा [न्] पुं, क्षयरोगः । "यक्ष्यते पूज्यते रोगराजत्वात् यक्ष्मा यक्ष क ड महि अन्तःस्थादिः शासुसिसिति मन् चवर्गतृतीयादिरित्येके तदा जक्ष भक्षहसनयोरित्यस्य रूपं राजयक्ष्मशब्दोऽप्यत्र ।" इत्यमरटीकायां भरतः ॥ (अस्य विवरणन्तु राजयक्ष्मशब्दे द्रष्टव्यम् ॥)

राजतं, त्रि, (रजतस्य विकारः । रजत + "प्राणिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इति अञ् ।) रजतनिर्म्मितम् । यथा,—
"सौवर्णं राजतं ताम्रं पितॄणां पात्रमुच्यते ।
रजतस्य कथा वापि दर्शनं दानमेव वा ॥"
इति मात्स्ये १७ अध्यायः ॥
रजते, क्ली ॥ (यथा, गो० रामायणे । ३ । ४८ । १ ।
"तं तु सीता मृगं दृष्ट्वा वने काञ्चनसुप्रभम् ।
हेमराजतचित्राभ्यां पार्श्वाभ्यां समलङ्कृतम् ॥")

राजतरुः, पुं, (तरूणां राजा । राजदन्तादित्वात् परनिपातः ।) कर्णिकारवृक्षः । आरग्वधः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते । ६ । ५७ ।
"मुस्तादिराजतरुवर्गदशाङ्गसिद्धैः
क्वाथैर्जयेन्मधुयुतैर्व्विविधैश्च लेहैः ॥")

राजतरुणी, स्त्री, (राज्ञस्तरुणीव । सौन्दर्य्यातिशय्यवत्त्वात् ।) पुष्पविशेषः । तत्पर्य्यायः । महासहा २ वर्णपुष्पः ३ अम्लानः ४ अम्लातकः ५ सुपुष्पः ६ सुवर्णपुष्पः ७ । अस्या गुणाः । कषायत्वम् । कफकारित्वम् । चक्षुष्यत्वम् । हर्षदत्वम् । हृद्यत्वम् । सुरभित्वम् । सुखवल्लभत्वञ्च । इति राजनिर्घण्टः ॥

राजता, स्त्री, राजत्वम् । राज्ञो भाव इत्यर्थे राजन्शब्दात् तल्प्रत्ययेन सिद्धा ॥ (यथा, कथासरित्सागरे । ३६ । ६८ ।
"तेन मत्तामनुच्चन्तीमपि मुक्त्वा स तां ययौ ।
रत्नकूटं स्वकार्य्यार्थी नित्यस्निग्धा हि राजता ॥")

राजतालः, पुं, (राज्ञस्ताल इव ।) गुवाकवृक्षः । इति शब्दरत्नावली ॥

राजतिमिशः, पुं, सुखाशः । इति हारावली । १८१ ॥

राजत्वं, क्ली, राजता । राज्ञो भाव इत्यर्थे राजन्शब्दात् त्वप्रत्ययेन निष्पन्नम् ॥ (यथा, कथासरित्सागरे । २० । १८१ ।
"कथ राजत्वमित्युक्त्वा स राजा निषिषेध तत् ॥")

राजदण्डः, पुं, (राज्ञो दण्डः ।) राजशासनम् । यथा,—
"ऊनैकादशवर्षस्य पञ्चवर्षाधिकस्य च ।
चरेद्गुरुः सुहृद्वापि प्रायश्चित्तं विशुद्धये ।
ततो न्यूनतरस्यास्य नापराधो न पातकम् ।
न चास्य राजदण्डोऽपि प्रायश्चित्तं न विद्यते ॥"
इति प्रायश्चित्ततत्त्वधृताङ्गिरोवचनम् ॥

राजदन्तः, पुं, दन्तानां राजा । ("राजदन्तादिषु परम् ।" २ । २ । ३१ । इति परनिपातः ।) उपरिश्रेणीस्थमध्यवर्त्तिदन्तद्वयम् । यथा,—
"राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचित् ॥"
इति हेमचन्द्रः ॥

राजदेशीयः, पुं, (ईषदूनो राजा । राजन् + "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः ।" ५ । ३ । ६७ । इति देशीयर् ।) राजदेश्यः । राजकल्पः । इति व्याकरणम् ॥

राजधत्तूरकः, पुं, (धत्तूरकाणां राजा । राजदन्तादित्वात् परनिपातः ।) दग्धुस्तूरः । इति कश्चित् राजनिर्घण्टः ॥ तस्य पर्य्यायः राजधुस्तूरशब्दे द्रष्टव्यः ॥

राजधर्म्मः, पुं, (राज्ञो धर्म्मः ।) राज्ञः कर्त्तव्यं कर्म्म । यथा,—
"राजधर्म्मान् प्रवक्ष्यामि यथावृत्तो भवेन्नृपः ।
सम्भवश्च यथा तस्य सिद्धिश्च परमा यथा ॥
ब्राह्मं प्राप्तेन संस्कारं क्षत्त्रियेण यथाविधि ।
सर्व्वस्यास्य यथान्यायं कर्त्तव्यं परिरक्षणम् ॥
अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् ।
रक्षार्थमस्य सर्व्वस्य राजानमसृजत् प्रभुः ॥
इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्म्मितो नृपः ।
तस्मादभिभवत्येष सर्व्वभूतानि तेजसा ॥
तपत्यादित्यवच्चैष चक्षूंषि च मनांसि च ।
न चैनं भुवि शक्नोति कश्चिदप्यभिवीक्षितुम् ॥
सोऽग्निर्भवति वायुश्च सोऽर्कः सोमः स धर्म्मराट् ।
स कुबेरः स वरुणः स महेन्द्रः प्रभावतः ॥
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठति ॥
एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥
कार्य्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः ।
कुरुते धर्म्मसिद्ध्यर्थं विश्वरूपं पुनःपुनः ॥
यस्य प्रसादे पद्मा श्रीर्व्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्व्वतेजोमयो हि सः ॥
तं यस्तु द्वेष्टि संमोहात् स विनश्यत्यसंशयम् ।
तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥
तस्माद्धर्म्मं यमिष्टेषु स व्यवस्येन्नराधिपः ।
अनिष्टञ्चाप्यनिष्टेषु तं धर्म्मं न विचालयेत् ॥
तस्यार्थे सर्व्वभूतानां गोप्तारं धर्म्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत् पूर्व्वमीश्वरः ॥
तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्म्मान्न चलन्ति च ॥
तं देशकालौ शक्तिञ्च विद्याञ्चावेक्ष्य तत्त्वतः ।
यथार्हतः संप्रणयेन्नरेष्वन्यायवर्त्तिषु ॥
स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणाञ्च धर्म्मस्य प्रतिभूः स्मृतः ॥
दण्डः शास्ति प्रजाः सर्व्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्ब्बुधाः ॥
समीक्ष्य स धृतः सम्यक् सर्व्वा रञ्जयति प्रजाः ।
असमीक्ष्य प्रणीतस्तु विनाशयति सर्व्वतः ॥
यदि न प्रणयेद्राजा दण्डं दण्ड्येष्वतन्द्रितः ।
शूले मत्स्यानिवापक्ष्यन् दुर्ब्बलान् बलवत्तराः ॥